শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ চতুরশীতিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুরশীতিতমঃ সর্গঃ ॥

## ৱিভীষণেন শ্রীরামং প্রতীন্দ্রজিতো মাযাযা রহস্যং ৱর্ণযিৎৱা সীতা জীৱতীতি ৱিশ্ৱাসস্য দৃঢীকরণং লক্ষ্মণং চ নিকুম্ভিলাং গমযিতুং প্রার্থনম্

রামমাশ্ৱাসমানে তু লক্ষ্মণে ভ্রাতৃৱৎসলে।
নিক্ষিপ্য গুল্মান্ স্ৱস্থানে তত্রাগচ্ছদ্ ৱিভীষণঃ॥ **6.84.1** ॥

নানাপ্রহরণৈর্ৱীরৈশ্চতুর্ভিরভিসংৱৃতঃ।
নীলাঞ্জনচযাকারৈর্মাতঙ্গৈরিৱ যূথপৈঃ॥ **6.84.2** ॥

সোঽভিগম্য মহাত্মানং রাঘৱং শোকলালসম্।
ৱানরাংশ্চাপি দদৃশে বাষ্পপর্যাকুলেক্ষণান্॥ **6.84.3** ॥

রাঘৱং চ মহাত্মানমিক্ষ্ৱাকুকুলনন্দনম্।
দদর্শ মোহমাপন্নং লক্ষ্মণস্যাঙ্কমাশ্রিতম্॥ **6.84.4** ॥

ৱ্রীডিতং শোকসন্তপ্তং দৃষ্টৱা রামং ৱিভীষণঃ।
অন্তর্দুঃখেন দীনাত্মা কিমেতদিতি সোঽব্রৱীৎ॥ **6.84.5** ॥

ৱিভীষণমুখং দৃষ্টৱা সুগ্রীৱং তাংশ্চ ৱানরান্।
লক্ষ্মণোৱাচ মন্দার্থমিদং বাষ্পপরিপ্লুতঃ॥ **6.84.6** ॥

হতা ইন্দ্রজিতা সীতা ইতি শ্রুৎৱৈৱ রাঘৱঃ।
হনূমদ্বচনাৎ সৌম্য ততো মোহমুপাশ্রিতঃ॥ **6.84.7** ॥

কথযন্তং তু সৌমিত্রিং সন্নিৱার্য ৱিভীষণঃ।
পুষ্কলার্থমিদং ৱাক্যং ৱিসংজ্ঞং রামমব্রৱীৎ॥ **6.84.8** ॥

মনুজেন্দ্রার্তরূপেণ যদুক্তস্ত্বং হনূমতা।
তদযুক্তমহং মন্যে সাগরস্যেৱ শোষণম্॥ **6.84.9** ॥

অভিপ্রাযং তু জানামি রাৱণস্য দুরাত্মনঃ।
সীতাং প্রতি মহাবাহো ন চ ঘাতং করিষ্যতি॥ **6.84.10** ॥

যাচ্যমানঃ সুবহুশো মযা হিতচিকীর্ষুণা।
ৱৈদেহীমুৎসৃজস্বেতি ন চ তৎ কৃতৱান্ ৱচঃ॥ **6.84.11** ॥

নৈৱ সাম্না ন দানেন ন ভেদেন কুতো যুধা।
সা দ্রষ্টুমপি শক্যেত নৈৱ চান্যেন কেনচিৎ॥ **6.84.12** ॥

ৱানরান্ মোহযিৎৱা তু প্রতিযাতঃ স রাক্ষসঃ।
মাযামযীং মহাবাহো তাং ৱিদ্ধি জনকাত্মজাম্॥ **6.84.13** ॥

চৈত্যং নিকুম্ভিলামদ্য প্রাপ্য হোমং করিষ্যতি।
হুতৱানুপযাতো হি দেৱৈরপি সৱাসৱৈঃ॥ **6.84.14** ॥

দুরাধর্ষো ভৱত্যেষ সঙ্গ্রামে রাৱণাত্মজঃ।
তেন মোহযতা নূনমেষা মাযা প্রযোজিতা॥ **6.84.15** ॥

ৱিঘ্নমন্ৱিচ্ছতা তত্র ৱানরাণাং পরাক্রমে।
সসৈন্যাস্তত্র গচ্ছামো যাৱত্তন্ন সমাপ্যতে॥ **6.84.16** ॥

ত্যজৈনং নরশার্দূল মিথ্যা সন্তাপমাগতম্।
সীদতে হি বলং সর্ৱং দৃষ্টৱা ৎৱাং শোককর্শিতম্॥ **6.84.17** ॥

ইহ ৎৱং স্বস্থহৃদযস্তিষ্ঠ সত্ত্বসমুচ্ছ্রিতঃ।
লক্ষ্মণং প্রেষযাস্মাভিঃ সহ সৈন্যানুকর্ষিভিঃ॥ **6.84.18** ॥

এষ তং নরশার্দূলো রাৱণিং নিশিতৈঃ শরৈঃ।
ত্যাজযিষ্যতি তৎকর্ম ততো ৱধ্যো ভৱিষ্যতি॥ **6.84.19**॥

তস্যৈতে নিশিতাস্তীক্ষ্ণাঃ পত্রিপত্রাঙ্গৱাজিনঃ।
পতত্রিণ ইৱাসৌম্যাঃ শরাঃ পাস্যন্তি শোণিতম্॥ **6.84.20**॥

তৎ সন্দিশ মহাবাহো লক্ষ্মণং শুভলক্ষণম্।
রাক্ষসস্য ৱিনাশায ৱজ্রং ৱজ্রধরো যথা॥ **6.84.21**॥

মনুজৱর ন কালৱিপ্রকর্ষো
 রিপুনিধনং প্রতি যৎক্ষমোঽদ্য কর্তুম্।
ৎৱমতিসৃজ রিপোর্ৱধায ৱজ্রং
 দিৱিজরিপোর্মথনে যথা মহেন্দ্রঃ॥ **6.84.22**॥

সমাপ্তকর্মা হি স রাক্ষসর্ষভো
 ভৱত্যদৃশ্যঃ সমরে সুরাসুরৈঃ।
যুযুৎসতা তেন সমাপ্তকর্মণা
 ভৱেৎ সুরাণামপি সংশযো মহান্॥ **6.84.23**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে চতুরশীতিতমঃ সর্গঃ॥